# Shri Sharadasvarupavyakhyanam

# શ્રીશારદાસ્વરૂપવ્યાખ્યાનમ્

## Document Information

Text title : Shri Sharadasvarupavyakhyanam

File name : shAradAsvarUpavyAkhyAnam.itx

Category : deities_misc, gurudev, rAmakRiShNa

Location : doc_deities_misc

Author : Swami Hiranyamayananda

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# શ્રીશારદાસ્વરૂપવ્યાખ્યાનમ્

વર્ણિતા યા વાણીરૂપેતિ રામકૃષ્ણેન શાશ્વતી
    સ્વસ્વરૂપં યન્મુખાત્ કાલિકેતિ પ્રકાશિતમ્ ।
દુર્ગા બગલામુખી ચેતિ વિવેકાનન્દેન ઘોષિતા
    સૈવ જ્ઞાનેચ્છાક્રિયામયી શ્રીશારદાદેવી સ્વયમ્ ॥ ૧॥

યા દેવી શ્રીવિદ્યેત્યાગમાદિષુ સંજ્ઞિતા
    ષોડશીતિ ચ યા ભગવતા રામકૃષ્ણેન પૂજિતા ।
રામકૃષ્ણલીલા પ્રસારણાય સર્વકલ્યાણકરણાય ચ
    સા નારીરૂપેણેહ માતૃભૂમાવાવિર્ભૂતા ॥ ૨॥

ષોડશીવિદ્યાયાસ્ત્રિકૂટમન્ત્રમધ્યે યો વાગ્ભવકૂટઃ,
સા દેવ્યાઃ સરસ્વત્યા જ્ઞાપયતિ સ્વરૂપં કથિતં રામકૃષ્ણપાદૈઃ ।
ત્રિકૂટમધ્યે કામરાજકૂટ ઇચ્છાત્મકં વર્ણયતિ
શ્રીકાલિકાયાઃ સ્વરૂપમથ શક્તિકૂટેન ક્રિયાત્મકં યત્ સૂચિતં
તદેવ દિવ્ય દૃષ્ટ્યા દુર્ગા બગલા ચેતિ
વિવેકાનન્દપાદૈઃ કીર્તિતમ્ ॥ ૩॥

ભાવત્રયવિગ્રહાયાઃ શારદાયા એકૈકભાવઃ
પ્રકટીકૃતો વિભિન્નકાલે ભગવતા રામકૃષ્ણેન
સ્વયં શારદયા વિવેકાનન્દપાદેન ચ ।
અતઃ સૈવ નિરતિશયપ્રકાશા મહાશક્તિર્દેવી શારદેતિ ॥ ૪॥

યસ્યાસ્ત્રિપુરસુન્દર્યા વિભિન્નરૂપાણિ મહાલક્ષ્મીરિતિ
મહાસરસ્વતીતિ મહાકાલિકેતિ ચ
જગદુદ્ભવ-પાલન-લયાન્ કુર્વતે
શ્યામા યસ્યાઃ પ્રધાનામાત્યો-વારાહી ચ દણ્ડનાયિકા
સા સર્વેશ્વરેશ્વરી સંરાજ્ઞી ભુવનાન્નામ્ ।
તસ્યા અર્ચાં વિધાતું શ્યામાં મહાવિદ્યાં

પ્રથમં પૂજયતઃ સિદ્ધૌ સત્યાં
જાયતેઽધિકારસ્ત્રિપુરસુન્દર્યાઃ પૂજાયામ્ ॥ ૫॥

યસ્યા મહિમાનં હરિહરાદિદેવતાઃ કદાપિ-વક્તુમલમ્ ।
સા દેવી શારદા સકલભુવનાનાં
સર્વભૂતાધિવાસાસર્વદા મામવતુ ॥ ૬॥

ઇતિ સ્વામિહિરણ્યમયાનન્દેન અમિત્રાક્ષરછન્દસાવિરચિતં
“શ્રીશ્રીશારદાસ્વરૂપવ્યાખ્યાનમ્” સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Shri Sharadasvarupavyakhyanam*
pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*